तमेव ज्ञात्वा मनसि तपश्चर्य्योपदेशकम्।
पतित्वेन तदा सन्ध्या ब्राह्मणं ब्रह्मचारिणम्॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता॥
तस्याः पुरोडाशमयं शरीरं तत्क्षणात्ततः।
दग्धं पुरोडाशगन्धं व्यस्तारयदलक्षितम्॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले।
शुद्धं प्रवेशयामास विष्णोरेवाज्ञया पुनः॥
सूर्य्यो द्विधा विभज्याथ तत्शरीरं तदा रथे।
स्वके संस्थापयामास प्रीतये पितृदेवयोः॥
यदूर्द्ध्वभागं तस्यास्तु शरीरस्य द्विजोत्तमाः।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगा।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा।
उदेति सायंसन्ध्या सा पितॄणां मोदकारिणी॥”
इति श्रीकालिकापुराणे अरुन्धतीजन्मकथने २२ अध्यायः॥

सायंसन्ध्यादेवता, स्त्री, (सायंसन्ध्याया देवता।) सरस्वती। इति कविकल्पलता॥

सायः, पुं, (स्यति समापयति दिनमिति। सो + श्याद्व्यधेति णः। ततो युगागमः।) दिनान्तः। इत्यमरः। १।४।३॥ बाणः। इति मेदिनी॥ सायोत्सवौ विकालके। इति त्रिकाण्डशेषः॥

सा(शा)यकः, पुं, (स्यति छिनत्तीति। सो + ण्वुल् + युक्।) बाणः। (यथा, रामायणे। २।३१।३०।
“अभेद्ये कवचे दिव्ये तूणी चाक्षय्यसायकौ॥”)
खड्गः। इत्यमरः। ३।३।२॥ (यथा, महाभारते। ४।४०।१४।
“कस्य पाञ्चनखे कोषे सायको हेमविग्रहः।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः॥”
पञ्चमसंख्या। यथा, साहित्यदर्पणे। ४।२६४।
“सङ्करेण त्रिरूपेण संसृष्टा चैकरूपया।
वेदखाग्निशराः शुद्धे रिषुबाणाग्निसायकाः॥”)

सायकपुङ्खा, स्त्री, (सायकस्य पुङ्ख इव पुङ्खो यस्याः।) शरपुङ्खा। इति राजनिर्घण्टः॥ (सायकस्य पुङ्खे, पुं। यथा, रघुः। २।३१।
“सव्याङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे॥”)

सायन्तनः, त्रि, (सायं भवः। सायम् + “सायंचिरंप्राह्णेप्रागव्ययेभ्यष्टुट्युलौ तुट् च।” ४।३।२३। इति ट्युल् तुट् च।) सायंकालभवः। यथा,—
“सन्ध्यां सायन्तनीं कुर्य्यात् द्वादश्यादिष्वपि प्रिये।
अकुर्व्वन्निरयं याति यतो नित्यागमक्रिया॥”
इति हृद्बीलतन्त्रे प्रथमपटलः॥

सायाह्नः, पुं, (सायमह्नः। “संख्याविसायेति।” ६।३।११०। ज्ञापकात् समासः।) पञ्चधाविभक्तदिनपञ्चमांशः। दिवसस्य शेषमुहूर्त्तत्रयम्। यथा,—
“प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तं स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तं स्यात् श्राद्धं तत्र न कारयेत्
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥”
इति तिथ्यादितत्त्वम्॥
तत्पर्य्यायः।
“सायो दिनान्तः सायाह्नो विकालः सायमेव च”
इति शब्दरत्नावली॥

सायिका, स्त्री, क्रमस्थितिः। इति शब्दरत्नावली॥

सायी, [न्] पुं, (सायति नाशयति गतिक्लेशमिति। सै क्षये + णिनिः।) अश्वारोहः। इति केचित्॥

सायुज्यं, क्ली, (सयुजो सहयोगस्य भावः। ब्राह्मणादित्वात् ष्यञ्।) सहयोगः। एकत्वम्। तत्तु पञ्चधामुक्त्यन्तर्गतमुक्तिविशेषः। यथा,—
“सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥”
इति श्रीभागवते। ३।२९।१३॥
“भक्तानां निष्कामतां कैमुतिकन्यायेनाह। सालोक्यं मया सह एकस्मिन् लोके वासम्। सार्ष्टिं समानैश्वर्य्यम्। सामीप्यं निकटवर्त्तित्वम्। सारूप्यं समानरूपताम्। एकत्वं सायुज्यम्। उत अपि दीयमानमपि न गृह्णन्ति कुतस्तत्कामना इत्यर्थः।” इति श्रीधरस्वामी॥
“एकत्वं भगवत्सायुज्यं ब्रह्मसायुज्यञ्च। अनयोस्तन्नीलात्मकत्वेन तत्सेवनार्थत्वाभावात ग्रहणावश्यकत्वमिवेति भावः।” इति क्रमसन्दर्भः॥

साये, व्य, दिनान्ते। सायंकाले। इति केचित्॥

सार, त् क दौर्व्वल्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) रेफोपधः। असमारत्। इति दुर्गादासः॥

सारं, क्ली, पुं, (सार त् क दौर्व्वल्ये + अच्। सृ गतौ + घञ् इति वा।) जलम्। धनम्। (यथा, रघुः। ४।७९।
“परस्परेण विज्ञातस्तेषूपायनपाणिषु।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा॥”)
न्याय्यम्। इति मेदिनी॥ (सरात् जातम्। सर + अण्।) नवनीतम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते उत्तरतन्त्रे। २६।
“क्षीरशेषञ्च तन्मथ्यं शीतं सारमुपाहरेत्॥”
अमृतम्। यथा, भागवते। ७।६।२५।
“धर्म्मादयः किमगुणेन च काङ्क्षितेन
सारंजुषां चरणयोरुपगायतां नः॥”)
लौहम्। इति भावप्रकाशः। विपिनम्। इति शब्दरत्नावली॥ *॥ सारवस्तूनि यथा,—
“सारं रसानान्तु घृतं घृतसारं हुतञ्च यत्।
हुतस्य सारं स्वर्गञ्च स्वर्गात् सारन्तु योषितः॥
अतो राजन् प्रदेयाः स्युः स्त्रियः स्वर्गमभीप्सतः।
तथैवेह सुखं ताभिः सह राज्यं नृपोत्तम॥”
इति वह्निपुराणे दासीदानाध्यायः॥
अपि च।
“असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम्॥”
इति कवितारत्नाकरधृतपुराणवचनम्॥

सारः, पुं, (सृ + “सृ स्थिरे।” ३।३।१७। इति घञ्।) बलम्। (यथा, महाभारते।१।१५५।२३।
“तरस्व भीम मा क्रीड़ जहि रक्षो विभीषणम्।
पुरा विकुरुते मायां भुजयोः सारमर्पय॥”)
स्थिरांशः। इत्यमरः। ३।३।१७०॥ (यथा, रघुः। १०।१०।
“प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा॥”)
मज्जा। इत्यमरः। २।४।१२॥ वज्रक्षारम्। इति राजनिर्घण्टः॥ वायुः। इति जटाधरः॥ रोगः। इति धरणिः॥ पाशकः। इति शब्दरत्नावली॥ दध्युत्तरम्। इति शब्दचन्द्रिका॥ (अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०।७३१।
“उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते॥”
यथा,—
“राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनासर्व्वस्वम्॥”)

सारः, त्रि, (सृ + घञ्।) अतिदृढ़ः। इति शब्दरत्नावली॥ वरः। श्रेष्ठः। इत्यमरमेदिनीकरौ॥ यथा,—
“सर्व्वसारो यथा कृष्णो व्रतानां पुण्यकं तथा॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३।२०॥
अपि च।
श्रीमार्कण्डेय उवाच।
“जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम्।
उत्पद्यते क्षणादेतत् क्षणादेतत् विपद्यते॥
यथैवोत्पद्यते सारान्निःसारं जगदञ्जसा।
पुनस्तस्मिन्विलीयन्ते महाप्रलयसङ्गमे॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः।
शम्भवे दर्शयामास भावेन जगतां पतिः॥
एकं शिवं शान्तमनन्तमच्युतं
परात्परं ज्ञानमयं विशेषम्।
अद्वैतमव्यग्रमचिन्त्यरूपं
सारन्त्वेकं नास्ति सारं त्वदन्यत्॥
यस्मादेतज्जायते विश्वमग्र्यं
यस्माल्लीनं स्यात् तत्पश्चात् स्थितञ्च।
आकाशवन्मेघजालस्य धृत्वा
यद्विश्वं वै भ्रियते तच्च सारम्॥
अष्टाङ्गयोगैर्यदाप्तुमिच्छन्
योगी युनक्त्यात्मरूपं सदैव।
निवर्त्तते प्राप्य यमेव लोके
तद्धि सारं सारमन्यन्न चास्ति॥